ॐ श्री गणेशाय नमः,,

शुभं

अथ: संध्या लिख्यते,,

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इति

जलाभिषेकः पृथ्वि! त्वया धृता लोका देवि! त्वं विष्णुना धृता। त्वं च धारय मां देवि! पवित्रं कुरु चासनम् ॥

ॐ अद्य ममोपात्तदुरितक्षयार्थे विस्णु प्रसन्नार्थे संध्योपासनं करिष्ये,,

इति संकल्प,,

वामे वहनं कुशान् दक्षिणो पाणो पवित्रं च् कुशत्र यं धृत्वा,

स प्रणव गायत्र्या शिखं बद्या,,

ईषानयाभि मुखं विष्णु विष्णु विष्णु रित्याचमेत,,

ततो वरिणते ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत। ततः समुद्रो अर्णवः। समुद्रादर्णवादधिसंवत्सरो अजायत। अहोराचाणि विदधद् विश्वस्य मिषतोवशी । सूर्याचन्द्रमसौधाता यथापूर्वकल्पयत् दिवंच पृथिवींचान्तरिक्षमथोस्वः ॥ +++ ॐ

कारस्य ब्रह्माऋषिः गायत्रीछन्दोऽग्निर्देवता शुक्लो वर्णः सर्वकर्मारम्भे विनियोगः॥ ॐ सप्तव्याह्रतीनां प्रजापति ऋषिः गायत्र्युष्णिगनुष्टुब्बृहती- पङ्क्तित्रिष्टुब्जगत्यश्छन्दांस्यग्निवाय्वादित्य-बृहस्पतिवरुणेन्द्रविश्वेदेवा देवता अनादिष्टप्रायश्चित्ते प्राणायामे विनियोगः॥ ॐ गायत्र्या विश्वामित्र ऋषिः गायत्री छन्दः सविता देवता अग्निर्मुखमुपनयने प्राणायामे विनियोगः॥
शिरसः प्रजापतिः ऋषिस्त्रिपदा गायत्री छन्दो ब्रह्माग्निवायुसूर्या देवता यजुः प्राणायामेविनियोगः ॥ ॐ उत्तिष्टंतु महाभूताये भूता भूमि पालकः भूता नाम वरोधेन ब्रह्म कर्म समाचरेत् आगच्छ वरदे देवि अक्षरे ब्रह्म वादिनी गायत्री छन्दसा माता ब्रह्म योनि नमोस्तुते अस्य श्री वसिष्टशाप मोचन मन्त्रस्य वसिष्ट ऋषि गायत्री छन्दः वसिष्ट

शाप मोचने विनियोगः अहो महा त्वह् रूपे दिव्य सिद्धे सरस्वती अजरे अमरे चैव वसिष्ट शाप मुक्तो भव इति स्मृत्वा वद्या सनः संमीलित नयनो मौती प्राणायाम त्रयं कुर्यात तत्र वायोरादान काले प्राणायामः

तत्र कमलासनम् रक्तवर्णं चतुर्मुखं ब्रह्माणहृदि ध्यायेत्

त्याग काले रेचकः तत्र श्वेतम् ललाददेशे तत्रिनेत्रं शिवं ध्यायेत्,, तस्य स्वरूपं,, ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् । ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ इति प्राणायामः,, अथ अंबुप्राशनं

सूर्यश्च मेति ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवता अपामुपस्पर्शने विनियोगः॥

ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत्किञ्च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा॥ इति प्रात राचमेत् ॐ आपः पुनंत्विति,, विष्णु ऋषि अनुष्टुप् छन्दः , आपो देवता,आपमुप स्पर्शने विनियोगः:

ॐ आपः पुनंतु पृथिवीं पृथिवी पूता पुन्तुमाम्,, +++

स्वाहा इति मध्यान्हे,, ॐ अग्निश्च मेति रुद्र ऋषिः,, प्रकृति छन्दः,, अग्नि देवता,, अपामुप स्पर्शने विनियोगः,, ॐ अग्निश्चमामत्पुश्च मत् ___

ॐ भू अंगुष्ठाभ्यां नमः ।
ॐ भुवः तर्जनीभ्यां नमः ।
ॐ स्वः मध्यमाभ्यां नमः ।
ॐ तत्सवितुवरेण्यं अनामिकभ्यां नमः ।
ॐ भर्गोदेवस्यधीमहि कनिष्ठिकाभ्यां नम: ।
ॐ धियोयोनःप्रचोदयात करतलकरपृष्टाभ्यां नम: ।

, इति करन्यास: ,

, अथ षडन्यास: ,

ॐ भू हृदयाय नमः ।
ॐ भुवः शिरसे स्वाहा ।
ॐ स्वः शिखायै वषट् ।
ॐ तत्सवितुवरेण्यं कवचाय हुं अनामिकभ्यां नमः ।
ॐ भर्गोदेवस्यधीमहि नेत्रत्रया वौषट् ।
ॐ धियोयोनःप्रचोदयात अस्त्राय फट् ।

, अथ ध्यानं ,

, ॐ श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा।
श्वेतैर्तिलेपनैः पुष्पैरलंकारैश्च भूषिता॥
आदित्यमण्डलस्था च ब्रह्मलोकगताथवा।
अक्षसूत्रधरा देवी पद्मासनगता शुभा ॥
मुक्ताविद्रुम हेमनील धवल च्छायैर्मुखै स्त्रीक्षणैः
युक्तामिन्दु निबद्ध रत्न मकुटां तत्वार्ध वर्णात्मिकाम् ।
गायत्त्रीं वरदाभयां कुशकशाश्शुभ्रं कपालं
गदां
शङ्खं चक्र मथारविन्द युगलं हस्तैर्वहन्तीं भजे
॥
ॐ तेजोऽसितिऋषयः शुक्रंदैवतं गायत्री छन्दः गायत्रावाहने
विनियोगः

ॐ तेजोऽसि शुक्रमस्यमृतमसि। धामनामासि प्रियं
देवानामनाधृष्टं देवयजनमसि॥

ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि। न हि
पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसेऽसावदोम् ॥

इतिध्यानमावाहनं,, अथ जपः +उक्त जप विधिना गायत्री जपेत्, तस्य स्वरूपं,,

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धीयो
यो नः प्रचोदयात् ।। ++

ॐ उत्तमे शिखरे देवी भूम्यां पर्वतमूर्धनि।

ब्रह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम॥